दिनाङ्क :- 28.11.2025 प्रात: - 06:55

## प्रधानमन्त्रिणः कर्नाटक-गोवा-भ्रमणम्

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य कर्नाटक-गोवा-राज्ययोः यात्रायां भविष्यति । श्रीमोदी कर्णाटकस्य उडुपीनगरस्य श्रीकृष्णमठं गत्वा, लक्षकण्ठ-गीतापरायण-कार्यक्रमे च भागं गृहीष्यति । प्रधानमन्त्री श्रीकृष्ण-गर्भगृहस्य सम्मुखे स्थितस्य स्वर्ण-तीर्थ-मण्डपस्य उद्घाटनं कृत्वा पवित्र-कनकन-किण्डीति कनक-गवाक्षाय कनक-कवचं च समर्पयिष्यति । तदनन्तरं प्रधानमन्त्री मोदी सारधा पञ्चाष्टमोत्सवस्य अवसरे गोवानगरे श्री संस्थान गोकर्ण परतगली जीवोत्तम मठस्य पञ्चाशदुत्तर-पञ्चशततमे वार्षिकोत्सवे भागं गृहीष्यति । श्रीमोदी मठस्य आवरणे स्थापितस्य श्रीरामस्य सप्तसप्तति-पाद-परिमितस्य भव्य-कांस्य-प्रतिमायाः अनावरणं करिष्यति तथा च रामायण-थीम-पार्क-उद्यानस्य उद्घाटनं करिष्यति । अस्मिन् अवसरे प्रधानमन्त्री सभां सम्बोधयित्वा विशेषं डाकटिकट इति पत्रालय-चीटिकां स्मारकमुद्रां च विमोचयिष्यति ।

## प्रीज - उत्तरयात्रा :

राष्ट्रपति द्रौपदी मुर्मूः अद्य लखनऊनगरे कार्यक्रमद्वये भागं गृहीष्यति। प्रथमम्, ऐषमः ब्रह्मकुमारीणां वार्षिक-विषयस्य “विश्व-एकतायै-विश्वासाय च ध्यानम्” इस्यस्य विमोचन-समारोहस्य शोभां वर्धयिष्यति। तदनंतरम्, लखनऊ-नगरे, राष्ट्रपतिः, भारत-स्काउट् एंड गाइड्स्-समूहस्य वज्र-महोत्सवस्य समापन-समारोहे भागं गृहीष्यति। तथा अस्य नवदशतम-राष्ट्रिय-जम्बूरीं सम्बोधयिष्यति ।

## प्रधानमन्त्री स्काई रूट् परिसरः

प्रधानमन्त्रिणा ह्यः नवदिल्लीतः दृश्य-सम्मेलनद्वारा हैदराबादनगरे स्काईरूट् एरोस्पेस् इत्यस्य इन्फिनिटी परिसरस्य उद्घाटनं कृतम् । अस्मिन् अवसरे सम्बोधयता तेन प्रोक्तं, यत् व्यक्तिगत-संस्थानां कृते, परमाणुक्षेत्रं उद्घाटयितुं सर्वकारः अग्रे गच्छति । श्रीमोदिना प्रोक्तं, यत् एषः परिष्कारः भारतस्य ऊर्जासुरक्षा-प्रौद्योगिक्याः क्षेत्राय नूतनं गतिं प्रदास्यति ।

## रेलमन्त्री अश्विनीवैष्णवः

रेलमन्त्री अश्विनीवैष्णवः, इलेक्ट्रॉनिक्स-सूचना-प्रौद्योगिकी-राज्यमन्त्री जितिनप्रसादः च नवदिल्लीनगरे दृश्य-सम्मेलनद्वारा गोरखपुर-इज्जतनगर-एक्सप्रेस्-इत्यस्य रेलयानस्य कृते हरितध्वजं प्रदर्शितवन्तौ । रेलयानस्य मार्गः इज्जतनगरस्थानकं यावत् विस्तारितः अस्ति । वैष्णवमहोदयः अवदत् यत् उत्तरप्रदेशस्य रेलमार्गस्य वार्षिक-व्ययः प्रायः अष्टादश-गुणकेन वर्धितम् अस्ति ।

## राजनाथ भारत-इण्डोनेशिया वार्ता

रक्षामन्त्री राजनाथसिंहः अथ इन्डोनेशिया-देशस्य रक्षामन्त्री जाफ्री शम-सुदीन च नवदिल्लीनगरे तृतीयभारत-इण्डोनेशिया-रक्षामन्त्रिणां संवाद-सम्मेलनस्य सह-अध्यक्षतां कृतवन्तौ। सम्मेलने द्वयोः देशयोः हिन्दमहासागरस्य रिम् एसोसिएशन इत्यादिभिः बहुपक्षीय-रूपरेखाभिः सहकार्यं वर्धयितुं सहमतिः अभवत् ।

## सर्वोच्च न्यायालय-अक्षम

सर्वोच्चन्यायालयेन दिव्याङ्गानाम् उपरि अपमान-जनकटिप्पणीनां निवारणाय कठोरविधेः निर्माणाय विचारं कर्तुं केन्द्रसर्वकारः सूचितः। न्यायालयेन, अनुसूचितजाति-अनुसूचितजनजाति-अधिनियमस्य पङ्क्तौ, दिव्याङ्गानाम्, दुर्लभानां आनुवंशिक-विकाराणाञ्च उपहासं कृत्वा अपमानजनकटिप्पण्याः कृते दण्डनीय-अपराध-रूपेण विधिनियमं कर्तुं सूचितम् ।

## फुटबॉल - अण्डर-17 एशिया कप

फुटबॉल इति पादकन्दुक-क्रीडायाम्, अद्य गुजरातनगरे ए.एफ.सी-अण्डर-17 एशिया-कप-सऊदी-अरब-2026-क्वालिफार्स्-क्रीडायाः समूह-डी-क्रीडायां भारत-दलेन लेबनान-दलं विरुद्ध्य क्रीडिष्यते । क्रीडास्पर्धा सायं सार्ध-सप्तवादने आरप्स्यते । भारतं सम्प्रति समूह-डी मध्ये चतुर्भिः अंकैः द्वितीयस्थाने स्थितम् अस्ति । अवधेयम्, यत् आगामिवर्षे ए.एफ.सी-अण्डर-17 एशिया-कप-सऊदी-अरब-क्रीडायाः कृते केवलं समूहविजेतारः एव योग्याः भविष्यन्ति ।

।।इति वार्ता:।।